# Shri Krishnamuktakam

# શ્રીકૃષ્ણમુક્તકમ્

## Document Information

Text title : Shri Krishnamuktakam

File name : kRRiShNamuktakam.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Proofread by : Mohan Chettoor

Description/comments : From Stotras Samahara Part 2 (ed. K.Raghavan Pillai)

Latest update : September 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણમુક્તકમ્

ઉદેતુ હૃદયાકાશે મમ હેરમ્બભાસ્કરઃ ।
ઉત્સાહકમલોલ્લાસં કુર્વન્ વિઘ્નહિમં નુદન્ ॥

અભ્યર્થિતઃ કમલજેન ભુવોઽપનેતું
    ભારં બભૂવ વસુદેવસુતોઽદ્ભુતાઙ્ગઃ ।
તાતેન યો વ્રજમનીયત કંસભીત્યા
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૧॥

નન્દેન નન્દનધિયા કિલ રક્ષ્યમાણો
    યઃ પૂતનામનયદન્તિકમન્તકસ્ય ।
વાત્યાસુરં ચ શકટં તુ પદા બિભેદ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૨॥

માત્રે પ્રદર્શ્ય ભુવનં વિવૃતે નિજાસ્યે
    ગર્ગેણ નામનિ કૃતે સહ પૂર્વજેન ।
જહ્રે મનાંસિ ચરિતૈર્વ્રજવાસિનાં યઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૩॥

દુશ્ચેષ્ટિતેન બત સંયમિતો જનન્યા
    પાશૈરુલૂખલ ઉપાસકલોકનિઘ્નઃ ।
ભઙ્ક્ત્વાર્જુનૌ ધનદજાવવતિ સ્મ યો વૈ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૪॥

ગોવર્ધનં ગિરિવરં સમુપેત્ય વત્સાન્
    સઞ્ચારયન્ સહબલસ્તદુપત્યકાસુ ।
યો વત્સદાનવમહન્ બકદાનવં ચ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૫॥

ગોપાભિકાનજગરોદરસમ્પ્રવિષ્ટાન્

દૃષ્ટ્વા સ્વયં પ્રસભમેત્ય ગળે પ્રવૃદ્ધઃ ।
પ્રાણૈર્વિયોજ્ય દિતિજં સ્વજનાનપાદ્ યઃ
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૬॥

બ્રહ્માણમાશુ પરિદર્શિતયોગમાયો
યોઽમૂમુહત્ કૃતવયસ્યકવત્સસઙ્ઘઃ ।
પ્રીતશ્ચ યઃ સપદિ સંસ્તુવતે ચ તસ્મૈ
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૭॥

પૌગણ્ડકં વય ઉપેત્ય મનોજ્ઞવેષો
વૃન્દાવને તુ પશુપૈઃ સહ ચારયન્ ગાઃ ।
યોઽહન્ બલેન સહ ધેનુકદૈત્યમુગ્રં
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૮॥

ક્રીડન્ વને સહૃદયૈઃ સહ ગોપવેષં
જ્યેષ્ઠેન યઃ સપદિ ધાતિતવાન્ પ્રલમ્બમ્ ।
મુઞ્જાટવીમુપગતોઽગ્નિભયાદપાત્ વાન્ ।
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૯॥

યઃ કાલિયસ્ય ગરુડસ્ય કલિન્દજાયાઃ
કાલુષ્યમેકપદ એવ પદા જહાર ।
વહ્નિં સમન્તત ઉપાગતમાપિબદ્ યઃ
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૧૦॥

યો યજ્ઞવિઘ્નકુપિતેન્દ્રનિયુક્તમેઘૈ-
રુત્સૃષ્ટવારિપરિપીડિતમાત્મનાથમ્ ।
ગોગોપવૃન્દમવિતું ધૃતવાન્ મહીધ્રં
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૧૧॥

ઇન્દ્રેણ યો ગતમદેન કૃતાભિષેકો
ગોવિન્દ ઇત્યભિહિતસ્ત્રિદશૈસ્સમેતૈઃ ।
નન્દં જલેશપુરનીતમુપાનયદ્ યઃ
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૧૨॥

યઃ પૃષ્ટનન્દવચસા ગતમર્ત્યબુદ્ધીન્
સ્વસ્મિન્ યથાર્થમવગન્તુમુદૂઢવાઞ્છાન્ ।
આત્મસ્વરૂપમવબોધયતિ સ્મ ગોપાન્

કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૧૩॥

વૃન્દાવને ચરતિ ચન્દ્રકરાભિમૃષ્ટે
વેણુસ્વનશ્રવણમોહિતવલ્લવીભિઃ ।
રાસોત્સવં વ્યતનુતાખિલમોહનં યઃ
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૧૪॥

યઃ શઙ્ખચૂડમવધીદબલા હરન્તં
વ્યોમં ચ ગોપગણમદ્રિગુહાં નયન્તમ્ ।
નન્દં વ્યમોચયદહેર્મુનિશાપતોઽમું
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૧૫॥

યોઽહન્નરિષ્ટમસુરં વૃષભાકૃતિં સ્વાન્
સન્ત્રાસયન્તમપિ કેશિનમશ્વરૂપમ્ ।
શ્રીનારદોદિતસમસ્તમહાપદાનઃ
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૧૬॥

અક્રૂરમાગતમકૃત્રિમભક્તિભાજં
યો માનયન્ સહબલો મધુરાં પ્રયાતઃ ।
માર્ગે પ્રદર્શ્ય પરમં મહિમાનમસ્મૈ
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૧૭॥

દુર્વાદિનં રજકમાશુ નિપાત્ય કુબ્જા -
મૃજ્વીં વિધાય ચ સુદામકવાયકાભ્યામ્ ।
દત્ત્વા વરં સપદિ યઃ પ્રબભઞ્જ ચાપં
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૧૮॥

હત્વા ગજં ઝટિતિ રઙ્ગગતઃ સરામ-
શ્ચાણૂરમુષ્ટિકમુખાન્ વિનિહત્ય મલ્લાન્ ।
કંસં ગુરુદ્રુહમહન્ સહ સોદરૈર્યઃ
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૧૯॥

કૃત્વા ચ બન્ધનગતૌ પિતરૌ વિમુક્તૌ
નન્દં વિસૃજ્ય સહ બન્ધુજનૈર્વ્રજાય ।
માતામહં યદુકુલસ્ય પતિં વ્યધાદ્ યઃ
કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૨૦॥

ગર્ગાત્ કૃતોપનયનો વ્રતમાસ્થિતો યઃ
    સાન્દીપનિં ગુરુમુપેત્ય ગૃહીતવિદ્યઃ ।
તસ્મૈ મૃતાર્ભકમદાદ્ધૃતપાઞ્ચજન્યઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૨૧॥

આશ્વાસ્ય ગોપવનિતાજનમુદ્ધવેન
    ગત્વા ગૃહં રમયતિ સ્મ વિતીર્ણગન્ધામ્ ।
શ્વાવલ્કિના હૃતપૃથાત્મજસઙ્કટો યઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૨૨॥

યો માગધેન સમુપાહૃતભૂમિભારં
    પ્રાપ્તાહવોપકરણો બત ચિત્રયુદ્ધમ્ ।
કૃત્વાગ્રજેન રહિતો બહુશો જહાર (સહિતો)
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૨૩॥

રુદ્ધે પુરે યવનકેન પુરીં વિધાય
    યો દ્વારકાં સ્વજનમત્ર નિવેશ્ય હૃષ્ટઃ ।
મ્લેચ્છં ચકાર મુચુકુન્દહગગ્નિદગ્ધં
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૨૪॥

માન્ધાતૃસૂનુમનુગૃહ્ય જરાસુતાય
    દત્ત્વા જયં શ્રુતવિદર્ભસુતાભિલાષઃ ।
તાં રાક્ષસેન વિધિનોદવહચ્છ્રિયં યઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૨૫॥

લબ્ધ્વા તુ શમ્બરહૃતં તનયં સ્મરં યઃ
    કૃત્વા પ્રયત્નમયશઃપરિમાર્જનાય ।
સાત્રાજિતીમપિ ચ જામ્બવતીમવાપ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૨૬॥

હત્વા સ્યમન્તકકૃતે દયિતાપિતૃઘ્ન-
    મક્રૂરસીરિહૃદિકાત્મજસત્યભામાઃ ।
ક્ષુબ્ધાઃ પ્રસન્નમનસશ્ચ કૃતા હિ યેન
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૨૭॥

કાળિન્દ્યવિન્દત પતિં મિહિરાત્મજા યં
    વિન્દાનુવિન્દસહજાપિ ચ મિત્રવિન્દા ।

બધ્દ્વર્ષભં સપદિ નાગ્નજિતી ચ સત્યા
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૨૮॥

ભદ્રાં ચ કેકયપતેસ્તનયામુવાહ
    ભિત્ત્વા ચ લક્ષમપરૈર્નર પૈરભેદ્યમ્ ।
મદ્રાધિપસ્ય તનયામપિ લક્ષણાં યઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૨૯॥

ભૌમં નિહત્ય સમુરં તદુપાહૃતાનાં
    સ્ત્રીણાં તુ ષોડશસહસ્રમુદાવહદ્ યઃ ।
તાભિઃ પૃથગ્ગૃહગતાભિરરંસ્ત વૈ યઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૩૦॥

દાતું તુ ભૌમહૃતકુણ્ડલમિન્દ્રમાત્રે
    સ્વર્ગં ગતઃ ખગવરેણ સસત્યભામઃ ।
યઃ સ્વસ્તરું સહ મદેન જહાર શચ્યાઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૩૧॥

આનર્તનાથતનયાપતિનાગ્રજેન
    યો દ્વારકામધિવસન્ નિજવલ્લભાસુ ।
એકૈકશો દશ દશાજનયત્ તનૂજાન્
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૩૨॥

યસ્ત્વર્જુનેન યતિવેષનિગૂહિતેન
    દુર્યોધનપ્રિયકૃતં હલિનં પ્રતાર્ય ।
ભદ્રાં સ્વસારમપહારિતવાન્ સુભદ્રાં
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૩૩॥

ઇન્દ્રાત્મજેન સહ ખાણ્ડવમગ્નિદગ્ધં
    કૃત્વા મયં ચ પરિરક્ષ્ય સભામનેન ।
યોઽકારયત્ પ્રિયકૃતે ખલુ ધર્મસૂનોઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૩૪॥

ભીમેન માગધનૃપં યુધિ ઘાતયિત્વા
    તદ્બદ્ધભૂપતિગણાંશ્ચ વિસૃજ્ય ભક્તાન્ ।
યોઽયાજયત્ ઋતુવરેણ હિ ધર્મસૂનું
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૩૫॥

હત્વા તુ ચૈદ્યપૃથિવીપતિદન્તવક્રા-
    વાજન્મનઃ પ્રભૃતિ સમ્ભૃતમત્સરૌ યઃ ।
તુષ્ટો બભૂવ કૃતકૃત્યતયાતિમાત્રં
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૩૬॥

સાલ્વં સસૌભમખિલાનપિ મોહયન્તં
    હત્વા સસૈન્યમપિ પૌણ્ડ્રકકાશિપૌ યઃ ।
ચક્રે ચ કાશિનગરીં નિજચક્રદગ્ધાં
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૩૭॥

આકૃષ્ટનીલસરિતા વિવિદાન્તકર્ત્રા
    સામ્બાપકારવિષમીકૃતહસ્તિનેન ! ।
યસ્ત્વગ્રજેન સહ રઞ્જિતવાંસ્ત્રિલોકીં
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૩૮॥

અજ્ઞાતભૂમિસુરધેન્વપહારદોષાત્
    સમ્પ્રાપ્તકૂપવસતિં કૃકલાસરૂપમ્ ।
ઉદ્ધૃત્ય યો ગમિતવાન્ નૃપતિં નૃગં સ્વઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૩૯॥

માયાવલોકનકુતૂહલતોઽભિયાતં
    ધર્મં ગૃહસ્થવિહિતં બહુધા પ્રદર્શ્ય ।
ચક્રે પ્રસન્નમનસં ખલુ નારદં યઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૪૦॥

શ્રુત્વા નિરુદ્ધમનિરુદ્ધમુપેત્ય બાણં
    જિત્વા વૃષધ્વજગિરા તમથાનુગૃહ્ય ।
પ્રત્યાનયત્ સપદિ પૌત્રમુષાન્વિતં યઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૪૧॥

દારિદ્ર્યતપ્તદયિતાવચસા સમેતં
    સ્વસ્મૈ પ્રદત્તપૃથુકપ્રસૃતિં કુચેલમ્ ।
ભૂત્યા જિતામરપતિં કૃતવાન્ ક્ષણાદ્ યઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૪૨॥

સૂર્યોપરાગસમયે ભૃગુવર્યતીર્થ-

    સ્નાનાર્થમાગતનૃપર્ષિસુહૃત્સમાજે ।
યજ્ઞોત્સવં સમતનોદૃષિભિઃ પિતુર્યઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૪૩॥

માત્રે તુ કંસનીહતાંસ્તનયાન્ પ્રદર્શ્ય
    વૈદેહભૂપતિવૃષશ્રુતદેવવિપ્રૌ ।
અન્વગ્રહીદ્ યુગપદેત્ય ગૃહં તયોર્યઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૪૪॥

ઉત્પાદ્ય ઘોરસમરં કુરુપાણ્ડવાનાં
    ભારં ભુવો બત જહાર નિરાયુધો યઃ ।
ધર્માત્મજં ચ જયિનં કૃતવાન્ સધર્મં
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૪૫॥

તીર્થાપ્લુતે મુનિજનોજ્ઝિતસૂતહત્યં
    સ્વિષ્ટક્રતું નિહતવલ્કલમપ્રજં યઃ ।
આનન્દયચ્ચિરવિયુક્તમુપેત્ય હૃષ્ટઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૪૬॥

જ્યેષ્ઠેન રુકમિણિ હતેઽતિબલેઽક્ષગોષ્ઠયાં
    કાલિઙ્ગભૂપદશનાંશ્ચ નિપાત્ય સેષાત્ ।
સઞ્ચપ્રિયાઞ્ચ સમરઞ્જયમાત્મના યઃ
(તઞ્ચપ્રિયાં ચ સમરઞ્જયદાત્મના યઃ)
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૪૭॥

પાર્થેન યઃ સહ પદં પરમં સ્વમેત્ય
    સ્વીકૃત્ય નષ્ટતનયાન્ દ્વિજપુઙ્ગવાય ।
દત્ત્વા વયસ્યમકરોત્ સફલપ્રતિજ્ઞં
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૪૮॥

મૂર્ત્યા ગિરા મધુરયા સ્મિતવીક્ષણાદ્યૈ-
    રાકૃષ્ટસર્વકરણાઃ સકલાશ્ચ દેવ્યઃ ।
આનન્દવારિધિગતા ન વિદુર્યતોઽન્યત્
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૪૯॥

યો વિપ્રશાપહતમાત્મકુલં નિશમ્ય
    વૈરાગ્યયુક્તમનસૌ પિતરૌ મુમુક્ષૂ ।

શ્રીનારદેન કૃતવાન્ વિદિતાત્મતત્ત્વૌ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૫૦॥

પ્રોવાચ યઃ સ્વમતમુત્તમમુદ્ધવાય
    યં સૂરયો જગતિ ભાગવતં વદન્તિ ।
પીતાસવં ચ કૃતવાન્ કુલમાત્મશેષં
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૫૧॥

કીર્તિં વિતત્ય ભુવને સકલાઘહન્ત્રીં
    યો દૈવતૈરનુમતો ભવપદ્મજાદ્યૈઃ ।
વ્યાધેન વિદ્ધચરણો ગતવાન્ સ્વકાષ્ઠાં
    કૃષ્ણોઽવતાત્ મ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૫૨॥

શ્રીકૃષ્ણમુક્તકમિદં પઠતાં જનાનાં
    યઃ પાતકાનિ સકલાનિ વિધૂય સદ્યઃ ।
ભક્તિં સ્થિરાં સ્વવિષયાં વિદધાતિ તુષ્ટઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૫૩॥

ગોપાત્મજા વ્રતકૃશાઃ પરિહાસપૂર્વં
    યોઽન્વગ્રહીત્ તદભિલાષસમર્થનેન ।
ચક્રે ચ યો દ્વિજસતીઃ સફલાત્મભક્તીઃ
    કૃષ્ણોઽવતાત્ સ ભગવાન્ હૃદયસ્થિતો નઃ ॥ ૫૪॥

કૃષ્ણઃ કૃષ્ણઃ કૃષ્ણ ઇત્યન્તકાલે
    જલ્પન્ જન્તુર્જીવિત યો જહાતિ ।
આદ્યઃ શબ્દઃ કલ્પતે તસ્ય મુક્ત્યૈ
    વ્રીળાનમ્રૌ તિષ્ઠતોઽન્યાવૃણાર્થૌ ॥ ૫૫॥

ઇતિ શ્રીકૃષ્ણમુક્તકં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

*Shri Krishnamuktakam*

pdf was typeset on September 4, 2022

Please send corrections to *sanskrit@cheerful.com*